Printed Pages – 3

# AI-1434

## M. A. (Final)
## Term End Examination, 2020-21

## SANSKRIT

***Paper : Second***

( ग्रंथ तथा चिंतक परम्परा )

***Time Allowed : Three hours***

***Maximum Marks : 100***

***Minimum Pass Marks : 36***

**नोट** : *सर्वे प्रश्नाः समाधेयाः । सर्वे प्रश्नाः समानाङ्काः ।*

1. ''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'' समीक्ष्यताम।

**अथवा**

''रतिर्देवादिविषया व्यभिचारी तथा उञ्जितः भावः प्रोक्तः।''

कथं समाधेयाः।





2. अधस्तनेषु कश्चिद्द्वयोः व्याख्या कार्या—

(क) द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीत॥

(ख) नानाशाखाधीतानां मन्त्राणां विनियोजक सूत्रं कल्पः। स च यजुर्विधा।

(ग) सरितामिव प्रवाहास्तुच्छाः प्रथमं यथोत्तरं विपुलाः। ये शास्त्रसभारम्भा भवन्ति लोकस्य ते वन्धाः॥

(घ) चत्वारि शृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यामाविवेश॥

3. कमपिद्वयं व्याख्येयम्—

(क) समाधिरान्तरः प्रयत्नो बाह्यस्त्वभ्यासः तावुभावपि शक्तिमुद्भासयतः।
'या केवलं काव्ये हेतुः इति यायावरीयः।'

(ख) सा च द्विधा कारयित्री भावयित्री च। कवेरुपकुर्वाणा कारयित्री। भावकस्योपकुर्वाणा भावयित्री।

(ग) प्रतिभातारतम्येन प्रतिष्ठा भुवि भूरिधा।
भावकस्तु कविः प्रायो न भजत्यधमां दशाम्॥

(घ) 'प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ' इति यायावरीयः।

4. कयोश्चिद्द्वयोः सप्रसङ्गं व्याख्या विधेयाः—

(क) तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥

(ख) कन्ये कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते॥

(ग) ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।
पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम्॥

(घ) अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।
तत्रवैदर्भगौडीयौ वर्ण्येते प्रस्फुरान्तरौ॥

5. अधोलिखितेषु द्वयमौचित्यं स्पष्टयत।

(क) गुणौचित्यम्

(ख) पदौचित्यम्

(ग) कारकौचित्यम्

(घ) लिङ्गौचित्यम्